M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1503

Title Sphuta Candrika

1503

Incomplete

	C	Sphoṭa Candrikā	Title
		Krishna	Author
			Editor
		1720 Śaka	Year, Vols.
SK			Publisher
1503			Remarks

तद्रूपप्रयोजनसत्वाच्च ॥ किंचात्र वाक्यार्थस्य कर्मत्वमिति तार्किकोक्तं न युक्तं ॥ तथाहि ॥ वाक्या
र्थोतिरिक्तोनतिरिक्तो वा ॥ नाद्यः ॥ तस्य वस्तुतुपस्थापितत्वेन दर्शितक्रियायां कर्मतया न्वया
नुपपत्तेः ॥ वस्तुपस्थापितस्यैव शाब्दबोधविषयत्वनियमात् ॥ अन्यथा पटपदात्समवाये
नोपस्थितस्याकाशस्यापि शाब्दबोधविषयापत्तेः ॥ न द्वितीयः ॥ विभक्त्यर्थमद्वारीकृत्य नामा
र्थस्य धात्वर्थेन सममभेदसंबंधेनान्वयो ऽव्युत्पन्नः ॥ अन्यथौदनः पचतीत्यापत्तेः ॥ न चात
त्र वाक्यार्थस्य कर्मत्वं न नामार्थस्येति वाच्यं ॥ रमणीयमोदनः पचतीत्यस्याप्यापत्तेः ॥ परस्य
लक्षणायां पञ्चायामित्यादौ तन्मितीपदाध्याहारेण वाक्यभेद एव ॥ एवं च वाक्यार्थस्य कर्मत्व
मित्यविचारिताभिधानं ॥ एवं नीलो घटो भवतीति वाक्ये नीलकर्तृकभवनाश्रयो घट इति
व्युत्पत्तिवादोक्तमपि न युक्तिसहं ॥ नामार्थस्येत्यादिव्युत्पत्तिबाधमानाभावात् ॥ नीलो घटो
भवनाश्रय इति बोधसंभवाच्च ॥ सविशेषणाहि विधिनिषेधौ विशेषणमुपसंक्रामतः स
विशेष्ये बाध इति विशेष्ये नीले एव भवनस्यान्वयो भविष्यतीति दिक् ॥ एवं तत्त्वमसि
सोयं देवदत्त इत्यादौ सखंडत्वं इत्थं पूर्ववदेव बोध्यं ॥ तत्त्वमसीत्यत्र तत्पदवाच्यसर्वज्ञ
त्वादिविशिष्टचैतन्यस्य त्वंपदवाच्येनांतःकरणविशिष्टचैतन्येनैक्यासंभवादैक्यसिध्य

स्फो॰वा॰

११

र्थेस्वरूपेजहदजहल्लक्षणेतिसांप्रदायिकाः॥ नन्वनयोरैक्ये किंमानं॥ नचनामार्थेतिसुत्राति:
तस्याः॥ किं॰ नामार्थयोरेवाभेदान्वयः॥ उत नामार्थयोरभेदएवेति॥ नाद्यः॥ घटपटा
दिष्वसादौव्यभिचारात्॥ तस्मात्संभवति सामानाधिकरण्ये वैयधिकरण्यमन्याय्यमिति
लाघवान्नलकोहिसः॥ ससं॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति भेदांशं दारर्वका
भेदप्रतिपादकश्रुतिमतं॥ न च तत्रापि यः नाना इव पश्यति स मृत्योर्मृत्युमाप्नोति यस्तु
वस्तुतः नानात्वं पश्यति स नेतीव शास्त्रश्रुति यस्मान्नार्थेन भेदस्यैव प्रतीतेः॥ किंच राजपु
रुषइत्यत्रेव तस्य त्वमिति षष्ठीसमासेनापि भेदस्यैव प्रतीतेरित्येतिवाच्यं॥ छांदोग्ये सदेव
सोम्येदमग्रआसीदित्यारभ्य तत्त्वमसि श्वेतकेतो इत्युपसंहारेण्योपक्रमो
पसंहारयोरेकरूपेण वेदतात्पर्यनिर्णायकेनैकत्वनिर्णीतत्वात्॥ ब्रह्मतं परदापोन्नवा
त्मैकब्रह्मवेदेति प्रसापिरेक्याववधारणात्॥ अस्मिन्पक्षेलाक्षणिकस्फोटः॥ वस्तुतस्तु॥ अयं
वाचकवाक्यस्फोट एव॥ तथाहि॥ विशिष्टशक्त्युपस्थापितयोस्तत्त्वंपदार्थयोरभेदान्वयानु राम
पपत्तावपिविशेष्ययोः शक्त्युपस्थापितयोरभेदान्वयेबाधकाभावः॥ यथाघटोऽनित्यत्र १२
घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेपियोग्यघटव्यक्त्या सहानित्यत्वान्वयः॥ तद्वत्॥ विशेष्य

एवशक्तिः॥ विशेषणांतू लक्षणं॥ अस्मिन्पक्षेन कोपि दोषः॥ यद्वा॥ यथा नानार्थस्थले संयोगा
दिनाभिधानियमनं तथा भेदान्वयानुरोधात् विशेष्य एवाभिधानियमः॥ अस्तु वा लाग्गसा
चजहल्लक्षणा तया च विशिष्टलक्षणां शास्त्रागमात्रं नु तु विशेष्येपि तस्या उपयोगः॥ शक्तैव तदु
पस्थितिसंभवात्॥ एवं सोयं देवदत्ते सर्वांपि॥ तथा च जहदजहल्लक्षणामसंगतमिति
दिक्॥ एवमेकोरसः पंचनौका भवंतीति वाक्ये सखंडाखंडत्वे पूर्ववदेव बोध्ये॥ अत्र तार्कि
काः॥ गच्छतीति वा चकः संख्या प्रकृतेर्विलक्षतेन्नेति वचनात्ससमर्थवत्सगतमेकवचन
मेव प्रधानं तत्र भवतीत्याहुः॥ तदयुक्तं॥ गच्छ्णाती॥ सस्वभ्रंतविषयत्वात्॥ यथासंघोष
वंतिब्राह्मणाः त्वमहं वास्यहं मतत्भवसित्वंह सो देवचनपुरुषयोः प्रकृतिगतयोरेव दर्श
नात्॥ ननु संकोचे किं मानं॥ सुरापिंडः खदिरांगारसदृशो कुंडलेभवत इति प्रायोग एव
उद्देश्यविधेयभावस्थले तु उद्देश्यगता संख्या ऽख्यातप्रसये ऽशास्त्यापि चेत्र मानांसुरिता
दि पुनरपि वाक्यं द्विविधं॥ कार्यात्मकमकार्यात्मकं च द्वितीयं तु तं॥ आद्यं तु तददोषा शास्त्र
र्थो संगुणावन्तलक्षणा पुनः कापी सनेन लक्षितं॥ अत्र यावद्दोषाभावोवत्तुमशक्यः॥ अ
संभवात्॥ यत्किंचिद्दोषाभावे अदोषपदवैयर्थ्यं तस्मान्नभो ऽप्यत्तुमर्थः॥ अत्तुदराकल्पेति

स्फो० वा० वत्॥ अप्यलंत्वस्फुटप्रतीयमानदोषराहित्यं॥ इदं काव्यलक्षणं रसगंगाधरे दूषितं॥ शब्दार्थ
१२ योर्व्यासज्यवृत्तिकाव्यत्वे काव्यं श्रुतमर्थो न ज्ञात इति व्यवहारासंभवात्॥ तदसमंजसं॥ एक
देशे दग्धेपि पटो दग्ध इतिवदेकदेशेपि प्रयोगसंभवात्॥ समुदायवृत्तयः शब्दाः क्वचिदेकदेशे
पि वर्तंते इति भाष्यात्॥ तल्लक्षणमेव तु न समंजसं॥ तथाहि॥ रमणीयार्थप्रतिपादकश
ब्दः काव्यं रमणीयत्वं च लोकोत्तराह्लादजनकज्ञानविषयत्वं इति तल्लक्षणं॥ इदं तत्त्वम
सीत्सादावतिव्याप्तं॥ न चाह्लादे वैजात्यं किं ततः लोकोत्तराह्लादजनकज्ञानविषयत्वस्यो
भयत्र तुल्यत्वात्॥ ब्रह्मानंदत्वेन सर्वैर्वर्णितत्वाच्च॥ किंच॥ रमणीयपदस्य रमणीयार्थप्र
तिपादकत्वमस्ति न वा॥ नाद्यः॥ रमणीयशब्दस्यापि रमणीयार्थप्रतिपादकशब्दत्वेन काव्य
त्वापत्तेः॥ इदं च भाष्ये पशब्दार्थको शब्दोपशब्द इति चेन्न॥ अपशब्दस्याप्यपशब्दत्वापत्तेरि
त्यनेन ध्वनितं॥ नांत्यः॥ रमणीयार्थप्रतिपादकत्वाभावे लक्षणत्वानुपपत्तेः॥ तस्मात्प्र
काशोक्तमेव लक्षणं सम्यक्॥ एवं वह्निना सिंचतीति वाक्यस्फोट एव न तु वाक्यार्थबोधे
योग्यतानिश्चयस्य प्रतिबंधकत्वे योग्यताज्ञानस्य कारणत्वे तार्किकादिसिद्धं तत्सिद्धं॥ प्र राम
कृते च वह्निः सेककरणं इति विषयबाधरूपायोग्यतानिश्चयरूपबाधकसत्त्वाद्दूषया वा १२

परूपयोग्यता ज्ञानसत्तात्मकं प्रमेयस्य वाक्यस्फोटत्वमिति चेत् सत्यं तात्पर्यविषयाबाधोऽयोग्यो-
ग्यता ॥ तदभावोऽयोग्यता सत्ते चासुध्याजलेन सिंचतीति तात्पर्यविषयः ॥ यथा ॥ असत्से-
णापतेः परार्द्धपरपालक्ष्मीहता संख्यया प्रत्तावसुरवेश्म भाण बधिरप्रख्याः किलाकीर्णयः ॥
गीयंते स्वरसप्रमेकलयता जातेन बध्योदरान्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधेरोधसि ॥
गगनं गगनाकारं सागराः सागरोपमाः ॥ रामरावणयोर्युद्धं रामरावणयोरिव ॥ २ ॥ कैलासस्य
प्रथमशिखरे वेणुसंमूर्छनाभिः श्रुत्वा कीर्तिं विबुधरमणीगीयमानां यदीयां ॥ स्रस्तापांगास्सर
सबिसनीकांडसंजातशंका दिङ्मातंगाः श्रवणपुलिने हस्तमावर्तयंति ॥ ३ ॥ पश्यनीलोत्पल
द्वंद्वान्निःसरंति सिताशरा इति ॥ आपालेकारिकवाक्ये पुंगणापाणौ पद्मसादौ तत्वमसीत्यादौ
चतात्पर्यविषयायोग्यत्वमिति सर्वसिद्धांतः ॥ तथाप्यि ॥ यत्र शाब्दबोधेऽयोग्यतानिश्चयस्य
न प्रतिबंधकत्वं च तेनापि त्वं बृहस्पतिरिति स्तावकवाक्यात्ततो बोधोपलब्धेः ॥ नाहं रंडापुत्र इ-
ति बाधनिश्चये सत्यपि त्वं रंडापुत्र इति वाक्यात् कोपोपलब्धेश्च ॥ शाब्दबोधाभावेऽनुप-
पत्तेः ॥ किंच पश्यनीलोत्पलद्वंद्वादित्यादिसाध्यवसायादिलक्षणास्थले शरानीलोत्पलद्वंद्वोपा-
दानकाः ॥ नेत्ययोग्यतानिश्चये सति तद्वाक्यश्रवणानंतरं वाक्यबोधोत्तरमयोग्यतानिश्च-

स्फो॰ वा॰ पः॥ पूर्ववाबाधः॥ बाधनिश्चये सति बोधाभावात्॥ तंसबोधाभावे त्वन्यथानुपपत्तेरभावात्॥
नहि स्वरूपसती अन्यथानुपपत्तिर्लक्षणाबीजं॥ किंतु ज्ञाता॥ न च पूर्वमयोग्यतानिश्चयस
१३ त्वेन संज्ञानमप्यस्त्येवेति वाच्यं॥ वाक्यार्थबोधजन्यान्यथानुपपत्तिज्ञानस्य पूर्वमभावात्॥ गंगा
घोषापिकरणं नेति लौकिकज्ञानसत्वे गंगायां घोष इति वाक्याद्गंगाधिकरणको घोष इति बोधो
त्तरमन्यथानुपपत्तिर्हि अनुभवसिद्धा न च तस्याः पूर्वं ज्ञानं संभवति॥ न च भ्रमात्मको बोध
इति तार्किकोक्तं युक्तिमत्॥ अयोग्यतानिश्चयस्य प्रतिबोधकत्वे योग्यताज्ञानस्य कारण
त्वं प्रकल्पनीयं भ्रमात्मको बोधश्च कल्पनीय इति महद्गौरवं॥ स्फोटवादिनां त्रितयमपि
न कल्प्यमिति लाघवं॥ वाक्यार्थबोधजन्यप्रवृत्तावेव तत्स्वीकारात्॥ किंच॥ नाहं परमेश्व
र इति बाधनिश्चये सति तत्त्वमसीति वाक्याद्बोधाभावे ब्रह्मात्मकबोधे वा न प्रमात्मकं ज्ञानं
संभवति भ्रमात्मकबोधस्य प्रमात्मकबोधजनकत्वायोग्यत्वात्॥ एवं दशमस्त्वमसीत्यत्रा
पि॥ ननु अनेकवर्णातिरिक्त अनेकध्वनिव्यंग्यो खंडवाक्यस्फोटः कः पदार्थ इति चेत् शृणु राम
यथा तार्किकैः एर्वोक्तमद्दीसागसंतरसंभवेपि चित्ररूपमतिरिक्तं स्वीक्रियते॥ यथा शाब्दि १३
कैः रेफद्वयाजभागविशिष्टः एकोवर्णः ऋति ऋवा लृति लृवा इत्यत्र वार्तिके स्वीक्रियते॥

यथानाभिव्यञ्जकैःसस्यानिर्देशोभोत्तरं प्रत्ययस्यादिति वार्तिके ऽनेकाक्षमेकवर्णात्मकत्वमुक्तं
तथास्माकमपि अनेकध्वनिव्यंग्यः वाक्यात्मक एको वर्ण इति स्वीक्रियते॥ स च शब्दब्रह्मरूपः तु
अमतत्र यं शब्दब्रह्मेति शब्दार्थशक्तिमित्यवदे जगुः॥ चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतिरि
ति॥ शब्दब्रह्मेति निर्वचनेनापि तस्य वर्णत्वं सिद्धं॥ अनुमानादपि॥ तथाहि॥ अखण्डवाक्य
स्फोटः एकवर्णरूपः श्रावणत्वात्॥ ध्वनिव्यंग्यत्वाद्वा॥ यन्नैवं तन्नैवं यथा पृथिव्यादि अन्व
यवद्दृष्टान्तस्तु मतान्तरसिद्धवर्णादिः॥ वस्तुतस्तु अन्वयव्यतिरेक्यनुमानं व्यर्थं उपनीय
मानेनैव गतार्थत्वात्॥ यथाहि॥ यथा चंदनखंडस्य लौकिकप्रत्यक्षे सौरभस्यालौकिकं त
था रसस्य लौकिकेऽवन्हेरलौकिकमिति अस्मिन्पक्षे उपनीतभावेनैनेति विवेकः॥ यद्वा ला
घवाद्दोषाभावाच्च ध्वनिव्यंग्यस्याभावाद्वर्णत्वस्वीकारः न च ध्वनिव्यंग्यत्वस्य गुणे व्यत
व्यंग्यप्रभेदकाप्रसक्तिस्तस्य स्वार्थस्यापि अन्यस्य संभव इति वाच्यं॥ तस्य ध्वनिविकारका
र्यव्यंग्यत्वे व्यंग्यत्वेऽपि ध्वनिव्यंग्यत्वाभावात्॥ किंच॥ कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा
धीर्ह्रीर्भीरित्येतत्सर्वं मन एवेति श्रुत्या कामादीनां मनोधर्मत्वप्रतिपादितेऽपि तार्कि
केरात्मधर्मत्वमुक्तं स सर्वैरप्यंगीकृतं न तत्स्मात्मकं॥ तद्बीजं तु यथा जपाकुसुमसन्नि

स्फो०वा० ध्याने स्फटिको हि लोहित इति ज्ञानं॥ प्रकृते तु मनःसान्निध्यं आत्मधर्मे बीजं॥ भ्रांतिबाध
१४ श्च स्फोटे तु न तथा॥ तस्मादेकवर्णात्मको खंडवाक्यस्फोटो वाचक इति सिद्धं॥ ॥ इति श्रीम
न्मौनिकुलतिलकायमानमोवड्डुनमहात्मज जानकीजानिरघुनाथमहात्मज श्रीकृष्ण
कृतस्फोटचंद्रिका संपूर्णा॥ ॥ श्रीमधुंडिराजदंडमंडितवक्रतुंडचरणारविंदेर्पणमस्तु॥ ॥
शके १७२० कालयुक्तिनाम संवत्सरे दक्षिणायने कार्तिके मासे सितपक्षे चतुर्थ्यां रविदिवसे
विठ्ठुंदकेसरिराघवसूनुनायं स्फोटचंद्रिका गुरुचरणपंकेरुहेऽर्पिता॥ ॥ ॥
भुजदंडरुचो निंबा समाविलंबे ह्योति वेदांति वेदांतिनैस्त कैंकर्कशधीरतानगजजंक
तैतिलैर्व्यापिका॥ यं श्लेः प्रियमात्मजं मतिविभुंके मैतिमी मांसिनः सोयं मत्तगजेंद्र
एवसततं पातुह्निनःपार्थ.द॥१॥ मंगलं लेखकानां च पाठकानां च मंगलं॥ मंगलं सर्वदेवा
नां मंगलायतनो हरिः॥२॥ ॥ ॥श्रीगजानन॥ ॥ ॥श्रीरामजयरामजयजय० राम
१४